No. of Page : 4 नामांक ROLL NO S - 34
No. of Q. : 30

# वार्षिक परीक्षा - 2017-18

## Class-XI

Time : 3¼ होरा: विषय - संस्कृत साहित्यम् MM. : 100

नोट :- 1. सर्वे प्रश्नाः अनिवार्याः
2. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

1. अकुह विसर्जनीयानां कण्ठः सूत्रस्य अर्थं लिखत। 1
2. केषां वर्णानाम् उच्चारणं तालुः भवति? 1
3. अधोलिखित वर्णानाम् उच्चारणस्थानानि लिखत। 1
(i) ऋ (ii) त (iii) ए (iv) व
4. अधोलिखित-पदानां सन्धिविच्छेदं कृत्वा संधेः नामापि लिखत- 3
(i) श्रीशः (ii) विष्णुस्त्राता (iii) सच्चित्
5. अधोलिखितानि शब्दरूपाणि आधृत्य वाक्यनिर्माणं कुरुत- 5
(i) पितुः (ii) विदुषा (iii) सवेभ्यः (iv) भवान्
6. अधोलिखितानि क्रियापदानि आधृत्य वाक्यनिर्माणं कुरुत- 5
(i) हसति (ii) भवन्तु (iii) सन्ति
(iv) लभसे (v) नेष्यामि
7. अधोलिखित-पदेषु प्रकृतिप्रत्ययौ योजयित्वा पदनिर्माणं कुरुत- 4
(i) कृ+क्तिन् (ii) पटु+तमप् (iii) मूषक+टाप् (iv) धन+इन्
8. मंजूषातः अव्ययं चित्वा रिक्तस्थान पूर्तिं कुरुत- 4
(खलु, शनैः शनैः, प्रायः, कुत्र, सर्वत्र, उच्चैः)
(i) ईश्वरः ............... अस्ति।
(ii) महेन्द्रः ............... निवसति?
(iii) बधिरस्य पार्श्वे जनाः ............... वदन्ति।
(iv) कच्छपः ............... गच्छति।
9. अधोलिखित-पदेषु समासविग्रहं कृत्वा समासस्य नामापि लिखत- 3
(i) शिवकेशवौ (ii) पंचवटी (iii) निर्जनम्
10. रेखाकिंतपदेषु विभक्तिं कारणञ्च लिखत। 3
(i) रामः <u>शिरसा</u> खल्वाटः।
(ii) <u>छात्रेषु</u> मोहनः श्रेष्ठः।
(iii) <u>गुरवे</u> नमः।

11. ऋग्वेदे कति मण्डलानि सन्ति ? 1
12. ब्राहमण ग्रन्थेषु कः विषयः विवेचितः ? 1
13. आरण्यकम् कः कथ्यते ? 1
14. हितोपदेशस्य रचयिता कः अस्ति ? 1
15. रामायणे कति काण्डानि सन्ति ? नामानि लिखत। 2
16. "किरातार्जुनीयम्" महाकाव्ये कस्य कथा अस्ति ? 1
17. विश्वस्य संपूर्णसाहित्ये सर्वाधिक-विशालग्रन्थः कः ? 1
18. बृहत्त्रयी का कथ्यते ? 1
19. महाकवि माघस्य जन्म कुत्र अभवत् ? 1
20. मानवजीवने अनुशासनस्य खलु महती आवश्यकता अस्ति। यदि मानवाः अनुशासन शीलाः न भवेयुः तदा तु विचित्रा जगतः गतिः स्यात्। अनुशासनेन एवास्माकं सर्वाणि कार्याणि भवन्ति। यस्मिन् देशे अनुशासन व्यवस्था उत्तमा वर्तते, तस्मिन् देशे एव सुख-प्राप्तिः भवति। अनुशासनेन एव सर्वेषां कल्याणं भवति। अनुशासनयुक्तः देशः उन्नतिं प्राप्नोति। अस्माकं व्यवहारेषु अपि अनुशासनं दृश्यते। छात्राणां कृते विद्यालय एव अनुशासनशिक्षाकेन्द्रम् अस्ति। यदि छात्राः ध्यानेन पठन्ति तर्हि भविष्ये जीवनस्य प्रत्येकस्मिन् क्षेत्रे साफल्यं प्राप्नुवन्ति। 5
    - (i) मानवजीवने कस्य महती आवश्यकता ? (एकपदेन उत्तरत)
    - (ii) जगतः गतिः विचित्रा कदा स्यात् ? (पूर्णवाक्येन उत्तरत)
    - (iii) 'अधमा' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।
    - (iv) 'प्राप्नुवन्ति' इत्यस्य कर्तृपदं चित्वा लिखत।
    - (v) गद्यांशस्य समुचितं शीर्षकं लिखत।
21. अधोलिखित- गद्यांशयोः कस्यचिदेकस्य हिन्दीभाषायां अनुवादः कुरुत- 5
    - (i) दिल्ली-नगरे महान् कलकलः। मार्गे मार्गे शृङ्गाटके शृङ्गाटके भेरीनादः। गृहे गृहे श्रृंगारः। महाराष्ट्रराजः रोगग्रस्तः इति आकलय्य च मुमुदिरे द्विषः। भिक्षुकाः प्रत्यहं यमुनातटे एव शष्कुली अपूपान् मोदकान् पेटाः इण्डरिकाश्च प्राप्य परस्परसहस्रैः आशीराभिः समवर्धयन्।
    - (ii) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि लक्ष्मी क्षीरसागरात् पारिजात पल्लवेभ्यो रागम् इन्दुशकलात् एकान्तवक्रताम् उच्चैः श्रवशचञ्चलताम् कालकूटान्मोहनशक्तिम् मदिरायाः मदम्, कौस्तुभमणेरति-

22. अधोलिखित पद्यांशयोः कस्यचिदेकस्य हिन्दीभाषायां अनुवादः कुरुत- 5

(i) श्रोतं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन॥

(ii) सुखमर्थो भवेद् दातुं, सुखं प्राणां; सुखं तपः।
सुखमन्यद् भवेत् सर्वम् दुखं न्यासस्य रक्षणम्॥

23. अधोलिखित नाट्यांशयोः कस्यचिदेकस्य हिन्दीभाषायां अनुवादः कुरुत- 5

(i) रामदासः - नहि पुत्र! नहि, इयं न साधारणी पीडा, इदं तु मम प्राणान्तमेव करिष्यति।

शिवः - गुरुवर्य! संसारे सर्वेषां रोगाणाम् औषधयः सन्ति। कथन्न ओषधिसेवनेन उदरपीडानाशः भविष्यति।

(ii) आचार्या - किं प्रष्टुमिच्छति ? कोऽपि प्रश्नः जिज्ञासा वा ?

स्वार्थानन्दः- जिज्ञासैव वर्तते।

आचार्या - का जिज्ञासा ? कीदृशी जिज्ञासा ?

24. अधोलिखित-गद्यांशयोः कस्यचिदेकस्य सप्रसंग-संस्कृत व्याख्या कुरुत- 5

(i) एवं स्वल्पकाले गच्छति राजस्थानस्यैको राजपुत्रः आगच्छत्। तस्य कापि शोभासामग्री नासीत्। स एक एवाश्वमेकमारूढः सन्नागमत्। आगत्यैव स स्वागमन सूचनामकारयत्। राजभृत्याश्च तमवदन्- किं मुधा कष्टमनुभवति भवान्।

(ii) बकः आह - ''अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः। पद्मिनी खण्डमण्डितं यच्चतुर्विंशत्यपि वर्षाणामनावृष्ट्या न शोषमेष्यति। तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि।

25. अधोलिखित- पद्यांशयोः कस्यचिदेकस्य सप्रसंगसंस्कृत-व्याख्या कुरुत- 5

(i) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे, पार्वती परमेश्वरौ॥

(ii) यस्तु पक्वमुपादत्ते काले परिणतं फलम्।
फलाद् रसं च लभते बीघाच्चैव फलं पुनः॥

26. अधोलिखित नाट्यांशयोः कस्यचिदेकस्य सप्रसंग संस्कृत-व्याख्या कुरुत- 5

(i) वासवदत्ता - आर्य! क एष उत्सारयति ?

यौगन्धरायण - भवति! यो धर्मादात्मानमुत्सारयति।

वासवदत्ता - आर्य! न ह्येवं वक्तुकामा, अहमपि

नामोत्सारयितव्या भवामीति।

(ii) शासक: - कथयतु तव क्षेत्रे कियदन्नमुत्पन्नम्?

हीरालाल: - केवलं बोरीद्वयं गोधूममुत्पन्नम्।

शासक: - वर्हि सार्ध बोरीम् एकां देहि मह्यम्।

27. अधोलिखितप्रश्नेषु केषाञ्चित् पञ्चप्रश्नानामुत्तराणि संस्कृत-भाषायां लिखत- 10

(i) वीरत्वस्य मूल्यं क: जानाति स्म?

(ii) व्याघ्रीदुग्धम् आनेतुं वनाभिमुखं क: प्रस्थितवान्?

(iii) कीदृशी वाणी पुरुषं समलङ्करोति?

(iv) चक्रव्यूहभेदे पाण्डवेषु क: समर्थ: अस्ति?

(v) कालिदासस्य सर्वस्व किम्?

(vi) प्रतापनामकस्य पत्रस्य सम्पादनं क करोति?

(vii) तारापीडस्य पुत्रस्य नाम किमासीत्?

(viii) आहुतय: कैभ्य: भवन्ति?

28. (i) सर्वत्रगुरु: क: गण: भवति? 1

(ii) आर्याछन्दस: लक्षणोदाहरणं लिखत। 2